श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

कृष्णयजुर्वेदीय तैत्तिरीय ब्राह्मणे

# ॥ तृतीयाष्टके नवमः प्रश्नः ॥

## (अश्वमेधम् - २)

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ तृतीयाष्टके नवमः प्रश्नः ॥

## (अश्वमेधम् - २)

हरिः ओ(४)म्।
प्र॒जाप॑तिरश्वमे॒धम॑सृजत।
सो᳚ऽस्माथ्सृ॒ष्टोऽपा᳚क्रामत्।
तम॑ष्टाद॒शिभि॒रनु॒प्रायु॑ङ्क्त।
तमा᳚प्नोत्।
तमा॒प्त्वाऽष्टा॑द॒शिभि॒रवा॑रुन्ध।
यद॑ष्टाद॒शिन॑ आल॒भ्यन्ते᳚।
य॒ज्ञमे॒व तैरा॒प्त्वा यज॑मा॒नोऽव॑रुन्धे।
सं॒व॒थ्स॒रस्य॒ वा ए॒षा प्र॑ति॒मा।
यद॑ष्टाद॒शिनः॑।
द्वाद॑श॒ मासाः॒ पञ्च॒र्तवः॑॥ **1**॥

सं॒व॒थ्स॒रो᳚ऽष्टाद॒शः।
यद॑ष्टाद॒शिन॑ आल॒भ्यन्ते᳚।
सं॒व॒थ्स॒रमे॒व तैरा॒प्त्वा यज॑मा॒नोऽव॑रुन्धे।
अ॒ग्नि॒ष्टे᳚ऽन्यान्प॒शूनु॑पाक॒रोति॑।

Please let us know of any errors in this text.

इत॑रेषु यूपे॑ष्वष्टाद॒शिनोऽजा॑मित्वाय।
नव॑न॒वाल॑भ्यन्ते सवीर्य॒त्वाय॑।
यदा॑ऽऽर॒ण्यैः सग्ग्॑स्था॒पये॑त्।
व्यव॑स्येतां पितापु॒त्रौ।
व्यध्वा॑नः क्रामेयुः।
विदू॒रं ग्राम॑योर्ग्रामा॒न्तौ स्यां॑ताम्॥ **2**॥

ऋ॒क्षीकाः॑ पुरुषव्या॒घ्राः प॑रिमो॒षिण॑ आव्या॒धिनी॒स्तस्क॑रा॒
अर॑ण्ये॒ष्वाजा॑येरन्न्।
तदा॑हुः।
अप॑शवो॒ वा ए॒ते।
यदा॑र॒ण्याः।
यदा॑र॒ण्यैः सग्ग्॑स्था॒पये॑त्।
क्षि॒प्रे यज॑मान॒मर॑ण्यं मृ॒तग्ं ह॑रेयुः।
अर॑ण्यायतना॒ ह्या॑र॒ण्याः प॒शव॒ इति॑।
यत्प॒शून्नालभे॑त।
अन॑वरुद्धा अस्य प॒शव॑ः स्युः।
यत्पर्य॑ग्निकृतानुथ्सृ॒जेत्॥ **3**॥

य॒ज्ञ॒वे॒श॒सं कु॑र्यात्।
यत्प॒शूना॒लभ॑ते।
तेनै॒व प॒शूनव॑रुन्धे।

यत्पर्य॑ग्निकृतानुथ्सृ॒जत्ययं॑ज्ञवेशसाय।

अव॑रुद्धा अस्य प॒शवो॒ भव॑न्ति।

न यं॑ज्ञवेश॒सं भ॑वति।

न यज॑मान॒मर॑ण्यं मृ॒तग्ं ह॑रन्ति।

ग्रा॒म्यैः सग्ग्स्था॑पयति।

ए॒ते वै प॒शवः॒ क्षेमो॒ नाम॑।

सम्पि॑ता पु॒त्राववं॑स्यतः।

समध्वा॑नः क्रामन्ति।

स॒म॒न्ति॒कं ग्राम॑योर्ग्रामा॒न्तौ भ॑वतः।

नर्क्षीका॑ः पुरुषव्या॒घ्राः प॑रिमो॒षिण॑ आव्या॒धिनी॒स्तस्क॑रा॒
अर॑ण्ये॒ष्वाजा॑यन्ते॥ **4**॥

ऋ॒तव॑ः स्यातामुथ्सृ॒जेथ्स्यं॑त॒स्त्रीणि॑ च॥ **1**॥

प्र॒जाप॑तिरकामयतो॒भौ लो॒कावव॑रुन्धी॒येति॑।

स ए॒तानु॒भयाँन्प॒शून॑पश्यत्।

ग्रा॒म्याग्श्चा॑र॒ण्याग्श्च॑।

ताना॑लभत।

तैर्वै स उ॒भौ लो॒काववा॑रुन्ध।

ग्रा॒म्यैरे॒व प॒शुभि॑रि॒मं लो॒कमवा॑रुन्ध।

आ॒र॒ण्यैर॒मुम्।

यद्ग्रा॒म्यान्प॒शूना॒लभ॑ते।

इ॒मम॒व तै॒र्लो॒कमवंरुन्धे।
यदां॒रण्यान्॥ **5**॥

अ॒मुं तैः।
अनंवरुद्धो॒ वा ए॒तस्यं संवथ्स॒र इत्यांहुः।
य इ॒त इंतश्चातुर्मा॒स्यानिं संवथ्स॒रं प्रंयु॒ङ्क्त इतिं।
ए॒तावा॒न्॒ वै सं॑वथ्स॒रः।
यच्चांतुर्मा॒स्यानिं।
यदे॒ते चांतुर्मा॒स्याः प॒शवं आल॒भ्यन्तें।
प्र॒त्यक्षंमे॒व तैः सं॑वथ्स॒रं यजंमा॒नोऽवंरुन्धे।
वि वा ए॒ष प्र॒जयां प॒शुभिंर् ऋद्ध्यते।
यः सं॑वथ्स॒रं प्रंयु॒ङ्क्ते।
सं॒व॒थ्स॒रः सुं॑व॒र्गो लो॒कः॥ **6**॥

सु॒व॒र्गं तु लो॒कं नापंराध्नोति।
प्र॒जा वै प॒शवं एकाद॒शिनीं।
यदे॒त ऐंकादशि॒नाः प॒शवं आल॒भ्यन्तें।
सा॒क्षादे॒व प्र॒जां प॒शून् यजंमा॒नोऽवंरुन्धे।
प्र॒जापंतिर्वि॒राजंमसृजत।
सा सृ॒ष्टाऽश्वंमे॒धं प्राविंशत्।
तां द॒शिभि॒रनु॒ प्रायुंङ्क्त।
तामांप्नोत्।

ताम॒त्वा द॒शिभि॒रवा॑रुन्ध।
यद्द॒शिनं॑ आल॒भ्यन्तेँ॥ **7**॥

वि॒राजं॑मे॒व तैरा॒त्वा यजं॑मा॒नोऽवं॑रुन्धे।
एका॑दश द॒शत॒ आलं॑भ्यन्ते।
एका॑दशाक्षरा त्रि॒ष्टुप्।
त्रैष्टुं॑भाः प॒शवं॑ः।
प॒शू॒नेवावं॑रुन्धे।
वै॒श्व॒दे॒वो वा अश्वं॑ः।
ना॒ना॒दे॒व॒त्याँ॑ः प॒शवो॑ भवन्ति।
अश्वं॑स्य सर्व॒त्वायं॑।
नाना॑रूपा भवन्ति।
तस्मा॒न्नाना॑रूपाः प॒शवं॑ः।
ब॒हु॒रू॒पा भं॑वन्ति।
तस्माँ॑द्बहु॒रू॒पाः प॒शव॒ः समृं॑द्ध्यै॥ **8**॥

आ॒र॒ण्या॒ल्लो॒को द॒शिनं॑ आल॒भ्यन्त॒े नाना॑रूपाः प॒शवो॒ द्वे चं॑॥ **2**॥

अ॒स्मै वै लो॒कायं॑ ग्रा॒म्याः प॒शव॒ आलं॑भ्यन्ते।
अ॒मु॒ष्मा॑ आर॒ण्याः।
यद्ग्रा॒म्यान्प॒शू॒ना॒लभं॑ते।
इ॒मम॒ेव तैर्लो॒कमवं॑रुन्धे।
यदा॑र॒ण्यान्।

अ॒मुं तैः।
उ॒भयाँन्प॒शूनालंभते।
ग्रा॒म्याग्श्चांर॒ण्याग्श्चं।
उ॒भयौँर्लो॒कयो॒रवंरुद्ध्यै।
उ॒भयाँन्प॒शूनालंभते॥ **9**॥

ग्रा॒म्याग्श्चांर॒ण्याग्श्चं।
उ॒भयंस्या॒न्नाद्य॒स्यावंरुद्ध्यै।
उ॒भयाँन्प॒शूनालंभते।
ग्रा॒म्याग्श्चांर॒ण्याग्श्चं।
उ॒भयेंषां पशू॒नामवंरुद्ध्यै।
त्रयंस्त्रयो भवन्ति।
त्रयं इ॒मे लो॒काः।
ए॒षां लो॒काना॒माप्त्यैँ।
ब्र॒ह्म॒वा॒दिनों वदन्ति।
कस्माँथ्स॒त्यात्॥ **10**॥

अ॒स्मिन्लो॒के ब॒हव॒ः कामा॒ इतिं।
यथ्संमा॒नीभ्यों दे॒वताँभ्यो॒ऽन्यैँऽन्ये प॒शवं आल॒भ्यन्तेँ।
अ॒स्मिन्ने॒व तल्लो॒के कामाँन्दधाति।
तस्मांद॒स्मिन्लो॒के ब॒हव॒ः कामाँः।
त्र॒या॒णां त्रंयाणाग्ं स॒ह व॒पा जुंहोति।

त्र्यांवृतो॒ वै दे॒वाः।
त्र्यांवृत इ॒मे लो॒काः।
ए॒षां लो॒काना॒माप्त्यै᳚।
ए॒षां लो॒काना॒ं क्लृप्त्यै᳚।
पर्य॑ग्निकृतानार॒ण्यानुथ्सृ॑ज॒न्त्यहिग्ं॑सायै॥ **11**॥

लो॒कयो॒रव॑रुध्या उ॒भया॑न्प॒शूनाल॑भते स॒त्यादहिग्ं॑सायै॥ **3**॥

यु॒ञ्जन्ति॑ ब्र॒ध्नमित्या॑ह।
अ॒सौ वा आ॑दि॒त्यो ब्र॒ध्नः।
आ॒दि॒त्यमे॒वास्मै॑ युनक्ति।
अ॒रु॒षमित्या॑ह।
अ॒ग्निर्वा अ॑रु॒षः।
अ॒ग्निमे॒वास्मै॑ युनक्ति।
चर॑न्त॒मित्या॑ह।
वा॒युर्वै चरन्न्॑।
वा॒युमे॒वास्मै॑ युनक्ति।
परि॑त॒स्थुष॒ इत्या॑ह॥ **12**॥

इ॒मे वै लो॒काः परि॑त॒स्थुष॑ः।
इ॒माने॒वास्मै॑ लो॒कान् यु॑नक्ति।
रोच॑न्ते रोच॒ना दि॒वीत्या॑ह।
नक्ष॑त्राणि॒ वै रो॑च॒ना दि॒वि।

नक्ष॑त्राण्ये॒वास्मै॑ रोचयति।
यु॒ञ्जन्त्य॑स्य॒ काम्येत्या॑ह।
कामा॑ने॒वास्मै॑ युनक्ति।
हरी॒ विप॑क्ष॒सेत्या॑ह।
इ॒मे वै हरी॒ विप॑क्षसा।
इ॒मे ए॒वास्मै॑ युनक्ति॥ **13**॥

शोणा॑ धृ॒ष्णू नृ॒वाह॒सेत्या॑ह।
अ॒हो॒रा॒त्रे वै नृ॒वाह॑सा।
अ॒हो॒रा॒त्रे ए॒वास्मै॑ युनक्ति।
ए॒ता ए॒वास्मै॑ दे॒वता॑ युनक्ति।
सु॒व॒र्गस्य॑ लो॒कस्य॒ सम॑ष्ट्यै।
के॒तुं कृ॒ण्वन्न॑ के॒तव॒ इति॑ ध्व॒जं प्रति॑मुञ्चति।
यश॑ ए॒वैन॒गं॒ राज्ञा॑ँ गमयति।
जी॒मूत॑स्येव भवति॒ प्रती॑क॒मित्या॑ह।
य॒था॒ य॒जु॒रे॒वैतत्।
ये ते॒ पन्था॑नः सवितः पू॒र्व्यास॒ इत्य॑ध्व॒र्युर्यज॑मानं
वाचयत्य॒भिजि॑त्यै॥ **14**॥

परा॒ वा ए॒तस्य॑ य॒ज्ञ ए॑ति।
यस्य॑ प॒शुरु॒पाकृ॑तो॒ऽन्यत्र॒ वेद्या॒ एति॑।
ए॒तग्ग्॒ स्तो॑तरे॒तेन॑ प॒था पुन॒रश्व॒मावर्त॑यासि न॒ इत्या॑ह।

वा॒युर्वै स्तोता᳚।
वा॒युमे॒वास्यं॑ प॒रस्ता᳚द्दधा॒त्यावृं॑त्यै।
यथा॒ वै ह॒विषो॑ गृही॒तस्य॒ स्कन्दं॑ति।
ए॒वं वा ए॒तदश्वं॑स्य स्कन्दति।
यदं॑स्यो॒पाकृं॑तस्य॒ लोमा॑नि॒ शीयं॑न्ते।
यद्वाले॑षु का॒चाना॒वयं॑न्ति।
लोमा᳚न्ये॒वास्य॒ तथ्सम्भं॑रन्ति॥ **15**॥

भूर्भुव॒ः सुव॒रिति॑ प्राजाप॒त्याभि॒रावं॑यन्ति।
प्रा॒जा॒प॒त्यो वा अश्वः॑।
स्वयै॒वैनं॑ दे॒वतं॑या॒ समं॑र्धयन्ति।
भूरिति॒ महिं॑षी।
भुव॒ इति॑ वा॒वाता᳚।
सुव॒रिति॑ परिवृ॒क्ती।
ए॒षां लो॒काना॑म॒भिजिं॑त्यै।
हि॒र॒ण्यया᳚ः का॒चा भं॑वन्ति।
ज्योति॒र्वै हिरं॑ण्यम्।
रा॒ष्ट्रमं॑श्वमे॒धः॥ **16**॥

ज्योतिं॑श्चै॒वास्मै॑ रा॒ष्ट्रं चं॑ स॒मीची॑ दधाति।
स॒हस्रं॑ भवन्ति।
स॒हस्रं॑सम्मितः सुव॒र्गो लो॒कः।

सु॒व॒र्गस्यं लो॒कस्या॒भिजिंत्यै।
अप॒ वा ए॒तस्मा॒त्तेजं इन्द्रि॒यं प॒शव॒ः श्रीः क्रांमन्ति।
यो॑ऽश्वमे॒धेन॒ यजंते।
वसंवस्त्वाऽञ्जन्तु गाय॒त्रेण॒ छन्द॒सेति॒ महिं॒ष्य॒भ्यंनक्ति।
तेजो॒ वा आज्यं॑म्।
तेजों गाय॒त्री।
तेजंसै॒वास्मै॒ तेजोऽवंरुन्धे॥ **17**॥

रु॒द्रास्त्वा॑ऽञ्जन्तु त्रैष्टुंभेन॒ छन्द॒सेतिं वा॒वाता॑।
तेजो॒ वा आज्यं॑म्।
इ॒न्द्रि॒यं त्रि॒ष्टुप्।
तेजंसै॒वास्मां इन्द्रि॒यमवंरुन्धे।
आ॒दि॒त्यास्त्वा॑ऽञ्जन्तु जागंतेन॒ छन्द॒सेतिं परिवृ॒क्ती।
तेजो॒ वा आज्यं॑म्।
प॒शवो॒ जगंती।
तेजंसै॒वास्मैं प॒शूनवंरुन्धे।
पत्नंयो॒ऽभ्यंञ्जन्ति।
श्रि॒या वा ए॒तद्रू॒पम्॥ **18**॥

यत्पत्नंयः।
श्रियंमे॒वास्मि॒न्तद्दंधति।
नास्मा॒त्तेजं इन्द्रि॒यं प॒शव॒ः श्रीरपं क्रामन्ति।

लाजी(३)ञ्छाची(३)न् यशो ममां(४) इत्यतिरिक्तमन्नमश्वायोपाहरन्ति।
प्रजामेवान्नादीं कुर्वते।
एतद्देवा अन्नमत्तैतदन्नमद्धि प्रजापत इत्याह।
प्रजायामेवान्नाद्यं दधते।
यदि नावजिघ्रेत्।
अग्निः पशुरासीदित्यवघ्रापयेत्।
अवं हैव जिघ्रति।
आक्रान् वाजी क्रमैरत्यक्रमीद्वाजी द्यौस्ते पृष्ठं पृथिवी
सधस्थमित्यश्वमनु मन्त्रयते।
एषां लोकानामभिजित्यै।
समिद्धो अञ्जन्कृदरं मतीनामित्यश्वस्याप्रियो भवन्ति
सरूपत्वाय॥ **19**॥

परितस्थुष इत्याहेमे एवाऽस्मै युनक्त्यभिजित्यै
भरन्त्यश्वमेधो रुन्धे रूपं जिघ्रति त्रीणि च॥ **4**॥

तेजसा वा एष ब्रह्मवर्चसेन व्यृद्ध्यते।
योऽश्वमेधेन यजते।
होता च ब्रह्मा च ब्रह्मोद्यं वदतः।
तेजसा चैवैनं ब्रह्मवर्चसेन च समर्धयतः।
दक्षिणतो ब्रह्मा भवति।
दक्षिणत आयतनो वै ब्रह्मा।

बा॒र्॒ह॒स्प॒त्यो वै ब्र॒ह्मा।
ब्र॒ह्म॒व॒र्च॒सम॒वास्य॑ दक्षिण॒तो द॑धाति।
तस्मा॒द्दक्षि॒णोऽर्धो᳚ ब्रह्मवर्च॒सित॑रः।
उ॒त्त॒र॒तो होता॑ भवति॥ **20**॥

उ॒त्त॒र॒त आ॑यतनो॒ वै होता᳚।
आ॒ग्ने॒यो वै होता᳚।
तेजो॒ वा अ॒ग्निः।
तेज॑ ए॒वास्यो᳚त्तर॒तो द॑धाति।
तस्मा॒दुत्त॒रोऽर्ध॑स्तेज॒स्वित॑रः।
यूप॑म॒भितो॑ वदतः।
य॒ज॒मा॒न॒दे॒व॒त्यो॑ वै यूप॑ः।
यज॑मानमे॒व तेज॑सा च ब्रह्मवर्च॒सेन॑ च॒ सम॑र्धयतः।
किग्ग्॒स्वि॑दासीत्पू॒र्वचि॑त्ति॒रित्या॑ह।
द्यौर्वै वृष्टि॑ः पू॒र्वचि॑त्तिः॥ **21**॥

दिव॑मे॒व वृष्टि॒मव॑रुन्धे।
किग्ग् स्वि॑दासीद्बृ॒हद्वय॒ इत्या॑ह।
अश्वो॒ वै बृ॒हद्वय॑ः।
अश्व॑मे॒वाव॑रुन्धे।
किग्ग्॒स्वि॑दासीत्पिशङ्गि॒॑लेत्या॑ह।
रात्रि॒र्वै पि॑शङ्गि॒॑ला।

रात्रिं॑मे॒वाव॑रुन्धे।
किग्ग्॑स्वि॑दासीत्पिलिप्पि॒लेत्या॑ह।
श्रीर्वै पि॑लिप्पि॒ला।
अ॒न्नाद्य॑मे॒वाव॑रुन्धे॥ **22**॥

कः स्वि॑देका॒की च॑र॒तीत्या॑ह।
अ॒सौ वा आ॑दि॒त्य ए॑का॒की च॑रति।
तेज॑ ए॒वाव॑रुन्धे।
क उ॑ स्विज्जायते॒ पुन॒रित्या॑ह।
च॒न्द्रमा॒ वै जा॑यते॒ पुन॑ः।
आयु॑रे॒वाव॑रुन्धे।
किग्ग्॑स्वि॑द्धि॒मस्य॑ भेष॒जमित्या॑ह।
अ॒ग्निर्वै हि॒मस्य॑ भेष॒जम्।
ब्र॒ह्म॒व॒र्च॒सम॒वाव॑रुन्धे।
किग्ग्॑स्वि॑दा॒वप॑नं म॒हदित्या॑ह॥ **23**॥

अ॒यं वै लो॒क आ॒वप॑नं म॒हत्।
अ॒स्मिन्ने॒व लो॒के प्रति॑तिष्ठति।
पृ॒च्छामि॑ त्वा॒ पर॒मं त॑ पृथि॒व्या इत्या॑ह।
वेदि॒र्वै परोऽन्त॑ः पृथि॒व्याः।
वेदि॑मे॒वाव॑रुन्धे।
पृ॒च्छामि॑ त्वा॒ भुव॑नस्य॒ नाभि॒मित्या॑ह।

य॒ज्ञो वै भुव॑नस्य॒ नाभिः॑।
य॒ज्ञमे॒वाव॑रुन्धे।
पृ॒च्छामि॑ त्वा॒ वृष्णो॒ अश्व॑स्य॒ रेत॒ इत्या॑ह।
सोमो॒ वै वृष्णो॒ अश्व॑स्य॒ रेतः॑।
सो॒म॒पी॒थमे॒वाव॑रुन्धे।
पृ॒च्छामि॑ वा॒चः प॑र॒मं व्यो॑मेत्या॑ह।
ब्र॒ह्म वै वा॒चः प॑र॒मं व्यो॑म।
ब्र॒ह्म॒व॒र्च॒सम॒वाव॑रुन्धे॥ **24**॥

होता॑ भवति॒ वै वृष्टिः॑ पू॒र्वचि॑त्तिर॒न्नाद्य॑मे॒वाऽव॑रुन्धे
म॒हदित्या॑ह॒ सोमो॒ वै वृष्णो॒ अश्व॑स्य॒ रेत॑श्च॒त्वारि॑ च॥ **5**॥

अप॒ वा ए॒तस्मा᳚त्प्रा॒णाः क्रा॑मन्ति।
यो᳚ऽश्वमे॒धेन॒ यज॑ते।
प्रा॒णाय॒ स्वाहा᳚ व्या॒नाय॒ स्वाहेति॑ संज्ञ॒प्यमा॑न॒ आहु॑तीर्जुहोति।
प्रा॒णाने॒वास्मि॑न्दधाति।
नास्मा᳚त्प्रा॒णा अप॑क्रामन्ति।
अव॑न्ती॒स्स्थाव॑न्तीस्त्वाऽवन्तु।
प्रि॒यं त्वा᳚ प्रि॒याणा᳚म्।
वर्षि॑ष्ठ॒माप्या॑नाम्।
नि॒धी॒नां त्वा॑ निधि॒पति॑ग्ं हवामहे वसो म॒मेत्या॑ह।
अपै॒वास्मै॒ तद्ध्नु॑वते॥ **25**॥

अथो॑ धु॒वन्त्ये॒वैन॑म्।
अथो॒ न्ये॑वास्मै॑ ह्नुवते।
त्रिः परि॑यन्ति।
त्रय॑ इ॒मे लो॒काः।
ए॒भ्य ए॒वैनं॑ लो॒केभ्यो॑ धुवते।
त्रिः पु॒नः परि॑यन्ति।
षट्थ्सम्प॑द्यन्ते।
षड्वा ऋ॒तव॑ः।
ऋ॒तुभि॑रे॒वैनं॑ धुवते।
अप॒ वा ए॒तेभ्य॑ः प्रा॒णाः क्रा॑मन्ति॥ **26**॥

ये य॒ज्ञे धुव॑नं त॒न्वते॑।
न॒व॒कृत्व॒ः परि॑यन्ति।
नव॒ वै पुरु॑षे प्रा॒णाः।
प्रा॒णाने॒वात्मन्द॑धते।
नैभ्य॑ः प्रा॒णा अप॑क्रामन्ति।
अम्बे॒ अम्बा॒ल्यम्बि॑क॒ इति॒ पत्नी॑मु॒दान॑यति।
अह्व॑ते॒वैना॑म्।
सुभ॑गे॒ काम्पी॑लवासि॒नीत्या॑ह।
तप॑ ए॒वैना॒मुप॑नयति।
सु॒व॒र्गे लो॒के सम्प्रोर्ण्वा॑था॒मित्या॑ह॥ **27**॥

सु॒व॒र्गमे॒वैनं॑ लो॒कं ग॑मयति।
आऽहम॑जानि गर्भ॒धमा त्वम॑जासि गर्भ॒धमित्या॑ह।
प्र॒जा वै प॒शवो॒ गर्भः॑।
प्र॒जामे॒व प॒शूना॒त्मन्ध॑त्ते।
दे॒वा वा अ॑श्वमे॒धे पव॑माने।
सु॒व॒र्गं लो॒कं न प्राजा॑नन्।
तमश्व॒ः प्राजा॑नात्।
यथ्सूचीभि॑रसिप॒थान्क॒ल्पय॑न्ति।
सु॒व॒र्गस्य॑ लो॒कस्य॒ प्रज्ञा॑त्यै।
गा॒य॒त्री त्रि॒ष्टुब्जग॒तीत्या॑ह॥ **28**॥

य॒था॒ य॒जु॒रे॒वैतत्।
त्र॒य्यः सू॒च्यो॑ भवन्ति।
अ॒य॒स्मय्यो॑ र॒ज॒ता हरि॑ण्यः।
अ॒स्य वै लो॒कस्य॑ रू॒पम॑य॒स्मय्यः॑।
अ॒न्तरि॑क्षस्य र॒ज॒ताः।
दि॒वो हरि॑ण्यः।
दिशो॒ वा अ॑य॒स्मय्यः॑।
अ॒वा॒न्त॒र॒दि॒शा र॑ज॒ताः।
ऊ॒र्ध्वा हरि॑ण्यः।

दिशं एवास्मै कल्पयति।
कस्त्वाँ छ्यति कस्त्वा विशास्तीत्याहाहिग्ंसायै॥ **29**॥

ह्वुवते क्रामन्त्यूर्णवाथामित्याह जगतीत्याह कल्पयत्येकं च॥ **6**॥

अप वा एतस्माच्छ्री राष्ट्रं क्रामति।
योँऽश्वमेधेन यजते।
ऊर्ध्वामेनामुच्छ्रयतादित्याह।
श्रीर्वै राष्ट्रमश्वमेधः।
श्रियमेवास्मै राष्ट्रमूर्ध्वमुच्छ्रयति।
वेणुभारं गिराविवेत्याह।
राष्ट्रं वै भारः।
राष्ट्रमेवास्मै पर्यूहति।
अथाँस्या मध्यमेधतामित्याह।
श्रीर्वै राष्ट्रस्य मध्यँम्॥ **30**॥

श्रियमेवावरुन्धे।
शीते वाते पुनन्निवेत्याह।
क्षेमो वै राष्ट्रस्य शीतो वातः।
क्षेममेवावरुन्धे।
यद्धरिणी यवमत्तीत्याह।
विड्वै हरिणी।
राष्ट्रं यवः।

विशं॑ चै॒वास्मै॑ रा॒ष्ट्रं च॑ स॒मीची॑ दधाति।
न पु॒ष्टं प॒शुमं॑न्यत॒ इत्या॑ह।
तस्मा॒द्राजा॑ प॒शून्न पुष्य॑ति॥ **31**॥

शू॒द्रा यद॑र्यजारा॒ न पोषा॑य धनाय॒तीत्या॑ह।
तस्मा᳚द्वैशीपु॒त्रं नाभिषिं॑ञ्चन्ते।
इ॒यं य॒का श॑कुन्ति॒केत्या॑ह।
विड्वै श॑कुन्ति॒का।
रा॒ष्ट्रम॑श्वमे॒धः।
विशं॑ चै॒वास्मै॑ रा॒ष्ट्रं च॑ स॒मीची॑ दधाति।
आ॒ह॒ल॒मिति॒ सर्प॒तीत्या॑ह।
तस्मा᳚द्रा॒ष्ट्राय॒ विशः॑ सर्पन्ति।
आह॑तं ग॒भे पस॒ इत्या॑ह।
विड्वै गभः॑॥ **32**॥

रा॒ष्ट्रं पसः॑।
रा॒ष्ट्रमे॒व वि॒श्याह॑न्ति।
तस्मा᳚द्रा॒ष्ट्रं विशं॒ घातु॑कम्।
मा॒ता च॑ ते पि॒ता च॑ त॒ इत्या॑ह।
इ॒यं वै मा॒ता।
अ॒सौ पि॒ता।
आ॒भ्यामे॒वैनं॒ परि॑ददाति।

अग्रं वृक्षस्यं रोहत् इत्याह।
श्रीर्वै वृक्षस्याग्रम्।
श्रियमेवावरुन्धे॥ 33॥

प्रसुंलामीति ते पिता गभे मुष्टिमतग्ंसयदित्याह।
विड्वै गर्भः।
राष्ट्रं मुष्टिः।
राष्ट्रमेव विश्याहन्ति।
तस्माद्राष्ट्रं विशं घातुकम्।
अप वा एतेभ्यः प्राणाः क्रामन्ति।
ये यज्ञेऽपूतं वदन्ति।
दधिक्राव्णो अकारिषमिति सुरभिमतीमृचं वदन्ति।
प्राणा वै सुरभयः।
प्राणानेवात्मन्दधते।
नैभ्यः प्राणा अपक्रामन्ति।
आपो हि ष्ठा मयोभुव इत्यद्भिर्मार्जयन्ते।
आपो वै सर्वा देवताः।
देवताभिरेवात्मानं पवयन्ते॥ 34॥

राष्ट्रस्य मध्यं पुष्यति गभो रुन्धे दधते चत्वारि च॥ 7॥

प्रजापतिः प्रजाः सृष्ट्वा प्रेणाऽनुप्राविंशत्।
ताभ्यः पुनः सम्भवितुं नाशक्नोत्।

सोऽब्रवीत्।
ऋध्नवदिथ्सः।
यो मेतः पुनः सम्भरदिति।
तं देवा अश्वमेधेनैव समभरन्न्।
ततो वै त आर्ध्नुवन्न्।
योऽश्वमेधेन यजते।
प्रजापतिमेव सम्भरत्यृध्नोति।
पुरुषमालभते॥ **35**॥

वैराजो वै पुरुषः।
विराजमेवालभते।
अथो अन्नं वै विराट्।
अन्नमेवावरुन्धे।
अश्वमालभते।
प्राजापत्यो वा अश्वः।
प्रजापतिमेवालभते।
अथो श्रीर्वा एकशफम्।
श्रियमेवावरुन्धे।
गामालभते॥ **36**॥

यज्ञो वै गौः।
यज्ञमेवालभते।

अथो अन्नं वै गौः।
अन्नमेवावरुन्धे।
अजावी आलभते भूम्ने।
अथो पुष्टिर्वै भूमा।
पुष्टिमेवावरुन्धे।
पर्यग्निकृतं पुरुषं चारण्याग्श्चोथ्सृजन्त्यहिग्ंसायै।
उभौ वा एतौ पशू आलभ्येते।
यश्चावमो यश्च परमः।
तेँऽस्योभये यज्ञे बद्धाः।
अभीष्टा अभिप्रीताः।
अभिजिता अभिहुता भवन्ति।
नैनं दङ्क्ष्णवः पशवो यज्ञे बद्धाः।
अभीष्टा अभिप्रीताः।
अभिजिता अभिहुता हिग्ंसन्ति।
योँऽश्वमेधेन यजते।
य उ चैनमेवं वेद॥ **37**॥

लभते गामालभते परमोँऽष्टौ च॥ **8**॥

प्रथमेन वा एष स्तोमेन राध्वा।
चतुष्टोमेन कृतेनायानामुत्तरेऽहन्न्।
एकविग्ंशे प्रतिष्ठायां प्रतितिष्ठति।

एकविꣳशात्प्रतिष्ठायां ऋतूनन्वारोहति।
ऋतवो वै पृष्ठानि।
ऋतवः संवथ्सरः।
ऋतुष्वेव संवथ्सरे प्रतिष्ठाय।
देवता अभ्यारोहति।
शक्वरयः पृष्ठं भवन्त्यन्यदन्यच्छन्दः।
अन्येऽन्ये वा एते पशव आलभ्यन्ते॥ **38**॥

उतेवं ग्राम्याः।
उतेवारण्याः।
अहरेव रूपेण समर्धयति।
अथो अह्न एवैष बलिर्ह्रियते।
तदाहुः।
अपशवो वा एते।
यदजावयश्चारण्याश्च।
एते वै सर्वे पशवः।
यद्गव्या इति।
गव्यान्पशूनुत्तमेऽहन्नालभते॥ **39**॥

तेनैवोभयान्पशूनवरुन्धे।
प्राजापत्या भवन्ति।
अनभिजितस्याभिजित्यै।

सौरीर्नव श्वेता वशा अनूबन्ध्या भवन्ति।
अन्तत एव ब्रह्मवर्चसमवरुन्धे।
सोमाय स्वराज्ञेऽनोवाहावनड्वाहाविति द्वन्द्विनः पशूनालभते।
अहोरात्राणामभिजित्यै।
पशुभिर्वा एष व्यृद्ध्यते।
योऽश्वमेधेन यजते।
छगलं कल्माषं किकिदीविं विदीगयमिति त्वाष्ट्रान्पशूनालभते।
पशुभिरेवात्मानग्ं समर्धयति।
ऋतुभिर्वा एष व्यृद्ध्यते।
योऽश्वमेधेन यजते।
पिशङ्गास्त्रयो वासन्ता इत्यृतुपशूनालभते।
ऋतुभिरेवात्मानग्ं समर्धयति।
आ वा एष पशुभ्यो वृश्च्यते।
योऽश्वमेधेन यजते।
पर्यग्निकृता उथ्सृजन्त्यनाव्रस्काय॥ **40**॥

लभ्यन्ते लभते त्वाष्ट्रान्पशूनालभतेऽष्टौ च॥ **9**॥

प्रजापतिरकामयत महानन्नादः स्यामिति।
स एतावश्वमेधे महिमानावपश्यत्।
तावगृह्णीत।
ततो वै स महानन्नादोऽभवत्।

यः का॒मयेत म॒हान॑न्ना॒दः स्या॒मिति॑।
स ए॒ताव॑श्वमे॒धे म॑हि॒मानौ॑ गृह्णीत।
म॒हाने॒वान्ना॒दो भ॑वति।
य॒ज॒मा॒न॒दे॒व॒त्या॑ वै व॒पा।
राजा॑ महि॒मा।
यद्व॒पां म॑हि॒म्नोभ॒यत॑ः परि॒यज॑ति।
यज॑मानमे॒व रा॒ज्येनो॑भ॒यत॒ः परि॑गृह्णाति।
पु॒रस्ता॑थ्स्वाहाकारा॒ वा अ॒न्ये दे॒वाः।
उ॒परि॑ष्टाथ्स्वाहाकारा अ॒न्ये।
ते वा ए॒तेऽश्वे॑ ए॒व मेध्य॑ उ॒भयेऽव॑रुध्यन्ते।
यद्व॒पां म॑हि॒म्नोभ॒यत॑ः परि॒यज॑ति।
ताने॒वोभया॑न्प्रीणाति॥ **41**॥

परि॒यज॑ति॒ षट्च॑॥ **10**॥

वै॒श्व॒दे॒वो वा अश्व॑ः।
तं यत्प्रा॑जाप॒त्यं कु॒र्यात्।
या दे॒वता॒ अपि॑भागाः।
ता भा॑ग॒धेये॑न॒ व्य॑र्धयेत्।
दे॒वता॑भ्यः स॒मदं॑ दध्यात्।
स्ते॒गान्दग्ग्ष्ट्रा॑भ्यां म॒ण्डूका॒न्जम्भ्ये॑भि॒रिति॑।
आज्य॑मव॒दानं॑ कृत्वा प्र॑तिस॒ङ्ख्याय॒माहु॑तीर्जुहोति।

या ए॒व दे॒वता॒ अपि॑भागाः।
ता भा॑ग॒धेये॑न॒ सम॑र्धयति।
न दे॒वता॓भ्यः स॒मद॑ं दधाति॥ **42**॥

चतु॑र्दशै॒ताननं॑नुवा॒काञ्जु॑हो॒त्यनं॑न्तरित्यै।
प्र॒या॒साय॒ स्वाहेति॑ पञ्चद॒शम्।
पञ्च॑दश॒ वा अ॑र्धमा॒सस्य॒ रात्र॑यः।
अ॒र्ध॒मा॒स॒शः सं॑वथ्स॒र आ॓प्यते।
दे॒वा॒सु॒राः संय॑त्ता आसन्न्।
ते॓ऽब्रुवन्न॒ग्नयः॑ स्विष्ट॒कृतः॑।
अश्व॑स्य॒ मेध्य॑स्य व॒यमु॑द्धा॒रमुद्ध॑रामहै।
अथै॒ताना॒भिभ॑वा॒मेति॑।
ते लोहि॑त॒मुद॑हरन्त।
ततो॑ दे॒वा अभ॑वन्न्॥ **43**॥

परा॒ऽसु॑राः।
यथ्स्वि॑ष्ट॒कृद्भ्यो॒ लोहि॑तं जु॒होति॒ भ्रातृ॑व्याभिभूत्यै।
भव॑त्या॒त्मना॓।
परा॓ऽस्य॒ भ्रातृ॑व्यो भवति।
गो॒मृ॒ग॒क॒ण्ठेन॑ प्रथ॒मामाहु॑तिं जुहोति।
प॒शवो॒ वै गो॑मृगः।
रु॒द्रो॓ऽग्निः स्वि॑ष्ट॒कृत्।

रुद्रादेव पशूनन्तर्दधाति।
अथो यत्रैषाऽऽहुतिर्हूयते।
न तत्र रुद्रः पशूनभिमन्यते॥ **44**॥

अश्वशफेन द्वितीयामाहुतिं जुहोति।
पशवो वा एकशफम्।
रुद्रोऽग्निः स्विष्टकृत्।
रुद्रादेव पशूनन्तर्दधाति।
अथो यत्रैषाऽऽहुतिर्हूयते।
न तत्र रुद्रः पशूनभिमन्यते।
अयस्मयेन कमण्डलुना तृतीयाम्।
आहुतिं जुहोत्यायास्यो वै प्रजाः।
रुद्रोऽग्निः स्विष्टकृत्।
रुद्रादेव प्रजा अन्तर्दधाति।
अथो यत्रैषाऽऽहुतिर्हूयते।
न तत्र रुद्रः प्रजा अभिमन्यते॥ **45**॥ ॥ **11**॥

दधात्यभवन्मन्यते प्रजा अन्तर्दधाति द्वे च॥ **11**॥

अश्वस्य वा आलब्धस्य मेध उदक्रामत्।
तदश्वस्तोमीयमभवत्।
यदश्वस्तोमीयं जुहोति।
स मेधमेवैनमालभते।

आज्येन जुहोति।
मेधो वा आज्यम्।
मेधोऽश्वस्तोमीयम्।
मेधेनैवास्मिन्मेधं दधाति।
षट्त्रिग्ंशतं जुहोति।
षट्त्रिग्ंशदक्षरा बृहती॥ **46**॥

बार्हताः पशवः।
सा पशूनां मात्रा।
पशूनेव मात्रया समर्धयति।
ता यद्भूयसीर्वा कनीयसीर्वा जुहुयात्।
पशून्मात्रया व्यर्धयेत्।
षट्त्रिग्ंशतं जुहोति।
षट्त्रिग्ंशदक्षरा बृहती।
बार्हताः पशवः।
सा पशूनां मात्रा।
पशूनेव मात्रया समर्धयति॥ **47**॥

अश्वस्तोमीयग्ं हुत्वा द्विपदा जुहोति।
द्विपाद्वै पुरुषो द्विप्रतिष्ठः।
तदेनं प्रतिष्ठया समर्धयति।
तदाहुः।

अ॒श्व॒स्तो॒मीयं॒ पूर्वग्ं॒ होत॒व्या(३)न्द्वि॒पदा(३) इतिं।
अश्वो॒ वा अंश्वस्तो॒मीयँम्।
पुरुंषो द्वि॒पदाँः।
अ॒श्व॒स्तो॒मीयग्ं॒ हु॒त्वा द्वि॒पदा॑ जुहोति।
तस्माँद्द्वि॒पाच्चतुं॑ष्पादमत्ति।
अथोँ द्वि॒पद्ये॒व चतुं॑ष्पदः॒ प्रतिं॑ष्ठापयति।
द्वि॒पदा॑ हु॒त्वा।
नान्यामुत्तंरा॒माहुंतिं जुहुयात्।
यद॒न्यामुत्तंरा॒माहुंतिं जु॒हु॒यात्।
प्र प्रंति॒ष्ठायाँश्च्यवेत।
द्वि॒पदा॑ अन्त॒तो जुंहोति॒ प्रतिं॑ष्ठित्यै॥ **48**॥

बृ॒ह॒त्यंर्धयति स्थापयति॒ पश्चं च॥ **12**॥

प्र॒जापंतिरश्वमे॒धमंसृजत।
सोँऽस्माथ्सृ॒ष्टोऽपाँक्रामत्।
तं यंज्ञक्र॒तुभि॒रन्वैँच्छत्।
तं यंज्ञक्र॒तुभि॒र्नान्वंविन्दत्।
तमिष्टिंभि॒रन्वैँच्छत्।
तमिष्टिंभि॒रन्वंविन्दत्।
तदिष्टीनामिष्टि॒त्वम्।
यथ्सं॑वथ्स॒रमिष्टिंभि॒र्यजंते।

अश्वंमे॒व तदन्विंच्छति।
सा॒वि॒त्रियों भवन्ति॥ **49**॥

इ॒यं वै सं॑वि॒ता।
यो वा अ॒स्यां नश्यंति॒ यो नि॒लयंते।
अ॒स्यां वाव तं विन्दन्ति।
न वा इ॒मां कश्च॒नेत्याहुः।
ति॒र्यङ्ङोर्ध्वोऽत्येंतुमरह॒तीति।
यथ्सांवि॒त्रियो॒ भवंन्ति।
स॒वि॒तृप्रंसूत ए॒वैनंमिच्छति।
ई॒श्व॒रो वा अश्व॒ः प्रमुंक्त॒ः परां परा॒वत॒ं गन्तोः।
यथ्सा॒यं धृतीर्जु॒होति।
अश्वंस्य॒ यत्यै॒ धृत्यैं॥ **50**॥

यत्प्रा॒तरिष्टिंभि॒र्यजंते।
अश्वंमे॒व तदन्विंच्छति।
यथ्सा॒यं धृतीर्जु॒होति।
अश्वंस्यै॒व यत्यै॒ धृत्यैं।
तस्माँथ्सा॒यं प्र॒जाः क्षे॒म्यां भवन्ति।
यत्प्रा॒तरिष्टिंभि॒र्यजंते।
अश्वंमे॒व तदन्विंच्छति।
तस्मा॒द्दिवा नष्टै॒ष एंति।

यत्प्रा॒तरि॒ष्टिभि॒र्यज॑ते सा॒यं धृती᳚र्जु॒होति॑।
अ॒हो॒रा॒त्राभ्या॑मे॒वैन॒मन्वि॑च्छति।
अथो॑ अहोरा॒त्राभ्या॑मे॒वास्मै॑ योगक्षे॒मं क॑ल्पयति॥ **51**॥

भ॒व॒न्ति॒ धृत्या॑ ए॒न॒मन्वि॑च्छ॒त्येकं॑ च॥ **13**॥

अप॒ वा ए॒तस्मा॒च्छ्री रा॒ष्ट्रं क्रा॑मति।
यो᳚ऽश्वमे॒धेन॒ यज॑ते।
ब्रा॒ह्म॒णौ वी॑णाग॒ाथिनौ॑ गायतः।
श्रि॒या वा ए॒तद्रू॒पम्।
यद्वीणा᳚।
श्रियं॑मे॒वास्मि॒न्तद्द॑त्तः।
य॒दा खल॒ु वै पुरु॑ष॒ः श्रियं॑मश्ञु॒ते।
वीणा᳚ऽस्मै वाद्यते।
तदा॑हुः।
यदु॒भौ ब्रा᳚ह्म॒णौ गायेंताम्॥ **52**॥

प्र॒भ्रगं॒शु॑काऽस्मा॒च्छ्रीः स्या᳚त्।
न वै ब्रा᳚ह्म॒णे श्री रं॑मत॒ इति॑।
ब्रा॒ह्म॒णो᳚ऽन्यो गाये᳚त्।
रा॒ज॒न्यो᳚ऽन्यः।
ब्रह्म॒ वै ब्रा᳚ह्म॒णः।
क्ष॒त्रगं॒ रा॑ज॒न्यः॑।

तथा॑ हास्य॒ ब्रह्म॑णा च क्ष॒त्रेण॑ चोभ॒यत॒ः श्रीः परि॑गृहीता भवति।
तदा॑हुः।
यदु॒भौ दिवा॒ गाये॑ताम्।
अपा॒ँस्माद्रा॒ष्ट्रं क्रा॑मेत्॥ **53**॥

न वै ब्रा॒ँह्म॒णे रा॒ष्ट्रग्ं र॑मत॒ इति॑।
य॒दा खलु॒ वै राजा॑ का॒मय॑ते।
अथ॑ ब्राह्म॒णं जि॑नाति।
दिवा॒ँ ब्राह्म॒णो गा॑येत्।
नक्तग्ं॑ राज॒न्यः॑।
ब्रह्म॑णो॒ वै रू॒पमहः॑।
क्ष॒त्रस्य॒ रात्रिः॑।
तथा॑ हास्य॒ ब्रह्म॑णा च क्ष॒त्रेण॑ चोभ॒यतो॑ रा॒ष्ट्रं परि॑गृहीतं भवति।
इत्य॑ददा॒ इत्य॑यजथा॒ इत्य॑पच॒ इति॑ ब्राह्म॒णो गाये॑त्।
इ॒ष्टा॒पू॒र्तं वै ब्रा॒ँह्म॒णस्य॑॥ **54**॥

इ॒ष्टा॒पू॒र्तेनै॒वैन॒ग्॒ं स सम॑र्धयति।
इत्य॑जिना॒ इत्य॑युध्यथा॒ इत्य॒मुग्ं स॑ङ्ग्रा॒मम॑ह॒न्निति॑ राज॒न्यः॑।
यु॒द्धं वै रा॑ज॒न्य॑स्य।
यु॒द्धेनै॒वैन॒ग्॒ं स सम॑र्धयति।
अक्लृ॑प्ता॒ वा ए॒तस्य॒र्तव॒ इत्या॑हुः।
यो॒ँऽश्वमे॒धेन॒ यज॑त॒ इति॑।

ति॒स्रो᳚ऽन्यो गाय॑ति ति॒स्रो᳚ऽन्यः।
षट्थ्सम्प॑द्यन्ते।
षड्वा ऋ॒तवः॑।
ऋ॒तू॒नेवास्मै᳚ कल्पयतः।
ताभ्याग्ं॑ स॒ग्ग्॒स्थाया᳚म्।
अ॒नो॒यु॒क्ते च॑ श॒ते च॑ ददाति।
श॒ता॒युः पुरु॑षः श॒तेन्द्रि॑यः।
आयु॑ष्ये॒वेन्द्रि॒ये प्रति॑तिष्ठति॥ **55**॥

गाये॑तां कामेद्ब्राह्म॒णस्य॑ कल्पयतश्च॒त्वारि॑ च॥ **14**॥

सर्वे॑षु॒ वा ए॒षु लो॒केषु॑ मृ॒त्यवो॒ऽन्वाय॑त्ताः।
तेभ्यो॒ यदाहु॑ती॒र्न जु॑हु॒यात्।
लो॒के लो॑क एनं मृ॒त्युर्वि॑न्देत्।
मृ॒त्यवे॒ स्वाहा॑ मृ॒त्यवे॒ स्वाहेत्य॑भिपू॒र्वमाहु॑तीर्जुहोति।
लो॒काल्लो॑का॒देव मृ॒त्युमव॑यजते।
नैनं॑ लो॒के लो॑के मृ॒त्युर्वि॑न्दति।
यद॒मुष्मै॒ स्वाहा॒ऽमुष्मै॒ स्वाहेति॒ जुह्व॑थ्स॒ञ्चक्षी॑त।
ब॒हुं मृ॒त्युम॒मित्रं॑ कुर्वीत।
मृ॒त्यवे॒ स्वाहेत्येक॑स्मा ए॒वैकां᳚ जुहु॒यात्।
एको॒ वा अ॒मुष्मि॑न्लो॒के मृ॒त्युः॥ **56**॥

अ॒श॒न॒या॒ मृत्युरे॒व।
तमे॒वामुष्मिँ॑ल्लो॒केऽवँ॑यजते।
भ्रू॒ण॒ह॒त्यायै॒ स्वाहेत्यँ॑वभृ॒थ आहु॑तिं जुहोति।
भ्रू॒ण॒ह॒त्यामे॒वावँ॑यजते॥
तदा॑हुः।
यद्भ्रूँ॑णह॒त्याऽपा॒त्र्याऽथँ॑।
कस्मा᳚द्य॒ज्ञेऽपि॑ क्रियत॒ इति॑।
अमृँ॑त्युर्वा अ॒न्यो भ्रूँ॑णह॒त्याया॒ इत्या॑हुः।
भ्रू॒ण॒ह॒त्या वाव मृत्युरिति॑।
यद्भ्रूँ॑णह॒त्यायै॒ स्वाहेत्यँ॑वभृ॒थ आहु॑तिं जु॒होति॑॥ **57**॥

मृत्युमे॒वाहु॑त्या तर्पयि॒त्वा प॑रि॒पाणं॑ कृ॒त्वा।
भ्रू॒ण॒घ्ने भे॑ष॒जं क॑रोति।
ए॒ताग्ं ह॒ वै मु॑ण्डि॒भ औद॑न्य॒वः।
भ्रू॒ण॒ह॒त्यायै॒ प्राय॑श्चित्तिं वि॒दाञ्च॑कार।
यो हा॒स्यापि॑ प्र॒जाया᳚ं ब्राह्म॒णग्ं हन्ति॑।
सर्व॑स्मै॒ तस्मै॑ भेष॒जं क॑रोति।
जु॒म्ब॒काय॒ स्वाहेत्य॑वभृ॒थ उ॑त्त॒मामाहु॑तिं जुहोति।
वरु॑णो॒ वै जु॑म्ब॒कः।
अ॒न्त॒त ए॒व वरु॑ण॒मव॑यजते।
ख॒ल॒तेर्वि॑क्लि॒धस्य॑ शु॒क्लस्य॑ पिङ्गा॒क्षस्य॑ मू॒र्धञ्जु॑होति।

ए॒तद्वै वरु॑णस्य रू॒पम्।
रू॒पेणै॒व वरु॑ण॒मव॑यजते॥ **58**॥

लो॒के मृ॒त्युर्जु॒होति॑ मू॒र्धञ्जु॑होति॒ द्वे च॑॥ **15**॥

वा॒रु॒णो वा अश्वः॑।
तं दे॒वत॑या॒ व्य॑र्धयति।
यत्प्रा॑जाप॒त्यं क॒रोति॑।
नमो॒ राज्ञे॒ नमो॒ वरु॑णा॒येत्या॑ह।
वा॒रु॒णो वा अश्वः॑।
स्वयै॒वैनं॑ दे॒वत॑या॒ सम॑र्धयति।
नमोऽश्वा॑य॒ नमः॑ प्र॒जाप॑तय॒ इत्या॑ह।
प्रा॒जा॒प॒त्यो वा अश्वः॑।
स्वयै॒वैनं॑ दे॒वत॑या॒ सम॑र्धयति।
नमोऽधि॑पतय॒ इत्या॑ह॥ **59**॥

धर्मो॒ वा अधि॑पतिः।
धर्म॑मे॒वाव॑रुन्धे।
अधि॑पतिर॒स्यधि॑पतिं मा कुर्वधि॑पतिर॒हं प्र॒जानां॑ भूयास॒मित्या॑ह।
अधि॑पतिमे॒वैनग्ं॑ समा॒नानां॑ करोति॥
मां धे॑हि॒ मयि॑ धे॒हीत्या॑ह।
आ॒शिष॑मे॒वैतामाशा॑स्ते।
उ॒पाकृ॑ताय॒ स्वाहेत्यु॒पाकृ॑ते जुहोति।

आलंभ्याय् स्वाहेति् नियुंक्ते जुहोति।
हुताय् स्वाहेतिं हुते जुंहोति।
ए्षां लो्कानांम्भिजिंत्यै॥ **60**॥

प्र वा ए्ष ए्भ्यो लो्केभ्यंश्च्यवते।
योँऽश्वमे्धेन् यजंते।
आ्ग्ने्यमैँन्द्रा्ग्नमाँश्वि्नम्।
तान्प्शूनालंभते् प्रतिंष्ठित्यै।
यदाँग्ने्यो भवंति।
अ्ग्निः सर्वा दे्वताः।
दे्वता ए्वावंरुन्धे।
ब्रह्म् वा अ्ग्निः।
क्ष्त्रमिन्द्रंः।
यदैँन्द्रा्ग्नो भवंति॥ **61**॥

ब्र्ह्म्क्ष्त्रे ए्वावंरुन्धे।
यदाँश्वि्नो भवंति।
आ्शिषा्मवंरुद्ध्यै।
त्रयो भवन्ति।
त्रयं इ्मे लो्काः।
ए्ष्वेंव लो्केषु प्रतिंतिष्ठति।
अ्ग्नयेऽग्ंहो्मुचे्ऽष्टाकंपाल् इति् दशंहविष्मिष्टिं निर्वंपति।

दशा॑क्षरा वि॒राट्।
अन्नं॑ वि॒राट्।
वि॒राजै॒वान्नाद्य॒मव॑रुन्धे।
अ॒ग्नेर्मन्वे प्र॒थमस्य॒ प्रचे॑तस॒ इति॑ याज्यानु॒वा॒क्या॑ भवन्ति सर्व॒त्वाय॑॥ **62**॥

अधि॑पतय॒ इत्या॑हा॒ऽभिजि॑त्या ऐन्द्रा॒ग्नो भव॑ति रुन्ध॒ एकं॑ च॥ **16**॥

यद्यश्वं॑मुप॒तप॑द्वि॒न्देत्।
आ॒ग्ने॒यम॒ष्टाक॑पाल॒ं निर्व॑पेत्।
सौ॒म्यं च॒रुम्।
सा॒वि॒त्रम॒ष्टाक॑पालम्।
यदा॑ग्ने॒यो भव॑ति।
अ॒ग्निः सर्वा॑ दे॒वता॑ः।
दे॒वता॑भिरे॒वैनं॑ भिषज्यति।
यथ्सौ॒म्यो भव॑ति।
सोमो॒ वा ओष॑धीना॒ग्ं॒ राजा॑।
याभ्य॑ ए॒वैनं॑ वि॒न्दति॑॥ **63**॥

ताभि॑रे॒वैनं॑ भिषज्यति।
यथ्सा॑वि॒त्रो भव॑ति।
स॒वि॒तृप्र॑सूत ए॒वैनं॑ भिषज्यति।
ए॒ताभि॑रे॒वैनं॑ दे॒वता॑भिर्भिषज्यति।

अ॒ग॒दो है॒व भ॑वति।
पौ॒ष्णं च॒रुं निर्व॑पेत्।
यदि॑ श्लो॒णः स्यात्।
पू॒षा वै श्लौण्य॑स्य भि॒षक्।
स ए॒वैन॑ भिषज्यति।
अश्लो॑णो है॒व भ॑वति॥ **64**॥

रौ॒द्रं च॒रुं निर्व॑पेत्।
यदि॑ मह॒ती दे॒वता॑ऽभि॒मन्ये॑त।
ए॒त॒द्दे॒व॒त्यो॑ वा अश्व॑ः।
स्वयै॒वैन॑ दे॒वत॑या भिषज्यति।
अ॒ग॒दो है॒व भ॑वति।
वै॒श्वा॒न॒रं द्वाद॑शकपाल॒ं निर्व॑पेन्मृगाख॒रे यदि॒ नागच्छे॑त्।
इ॒यं वा अ॒ग्निर्वै॑श्वान॒रः।
इ॒यमे॒वैनं॑म॒र्चिभ्यां॑ परि॒रोध॒माने॑यति।
आ है॒व सुत्य॒मह॑र्गच्छति।
यद्य॑धी॒यात्॥ **65**॥

अ॒ग्नयेऽग्ं॒हो॒मुचे॒ऽष्टाक॑पालः।
सौ॒र्यं पय॑ः।
वा॒य॒व्य॑ आज्य॑भागः।
यज॑मानो॒ वा अश्व॑ः।

अगंहसा वा एष गृहीतः।
यस्याश्वो मेधाय प्रोक्षितोऽध्येति।
यदगंहोमुचे निर्वपति।
अगंहस एव तेन मुच्यते।
यजमानो वा अश्वः।
रेतसा वा एष व्यृध्यते॥ **66**॥

यस्याश्वो मेधाय प्रोक्षितोऽध्येति।
सौर्यगं रेतः।
यथ्सौर्यं पयो भवति।
रेतसैवैनगं स समर्धयति।
यजमानो वा अश्वः।
गर्भैर्वा एष व्यृध्यते।
यस्याश्वो मेधाय प्रोक्षितोऽध्येति।
वायव्या गर्भाः।
यद्वायव्य आज्यभागो भवति।
गर्भैरेवैनगं स समर्धयति।
अथो यस्यैषाऽश्वमेधे प्रायश्चितिः क्रियते।
इष्ट्वा वसीयान्भवति॥ **67**॥

विन्दत्यश्वोणो हैव भवत्यधीयादंद्धयते गर्भैरेवनगं समर्धयति द्वे च॥ **17**॥

तदा॑हुः।
द्वाद॑श ब्रह्मौद॒नान्थ्सग्ग्॒स्थि॑ते॒ निर्व॑पेत्।
द्वा॒द॒शभि॒र्वेष्टि॑भिर्यजे॒तेति॑।
यदिष्टि॑भि॒र्यजे॑त।
उ॒प॒नामु॑क एनं य॒ज्ञः स्या॑त्।
पापी॑या॒ग्॒स्तु स्या॑त्।
आ॒प्तानि॒ वा ए॒तस्य॒ छन्दाग्॒॑सि।
य ई॑जा॒नः।
तानि॒ क ए॒ताव॑दाशु॒ पुन॒ः प्रयु॑ञ्जी॒तेति॑।
सर्वा॒ वै सग्ग्॒स्थि॑ते य॒ज्ञे वागा॑प्यते॥ **68**॥

साऽऽप्ता भ॑वति या॒तया॑म्नी।
क्रू॒रीकृ॑तेव॒ हि भव॒त्यरु॑ष्कृता।
सा न पुन॑ः प्र॒युज्येत्या॑हुः।
द्वाद॑शै॒व ब्र॑ह्मौद॒नान्थ्सग्ग्॒स्थि॑ते॒ निर्व॑पेत्।
प्र॒जाप॑ति॒र्वा ओ॑द॒नः।
य॒ज्ञः प्र॒जाप॑तिः।
उ॒प॒नामु॑क एनं य॒ज्ञो भ॑वति।
न पापी॑यान्भवति।
द्वाद॑श भवन्ति।

द्वादश मासाः संवथ्सरः।
संवथ्सर एव प्रतितिष्ठति॥ **69**॥

आप्यते संवथ्सर एकं च॥ **18**॥

एष वै विभूर्नाम यज्ञः।
सर्वग्ं ह वै तत्र विभु भवति।
यत्रैतेन यज्ञेन यजन्ते।
एष वै प्रभूर्नाम यज्ञः।
सर्वग्ं ह वै तत्र प्रभु भवति।
यत्रैतेन यज्ञेन यजन्ते।
एष वा ऊर्जस्वान्नाम यज्ञः।
सर्वग्ं ह वै तत्रोर्जस्वद्भवति।
यत्रैतेन यज्ञेन यजन्ते।
एष वै पयस्वान्नाम यज्ञः॥ **70**॥

सर्वग्ं ह वै तत्र पयस्वद्भवति।
यत्रैतेन यज्ञेन यजन्ते।
एष वै विधृतो नाम यज्ञः।
सर्वग्ं ह वै तत्र विधृतं भवति।
यत्रैतेन यज्ञेन यजन्ते।
एष वै व्यावृत्तो नाम यज्ञः।
सर्वग्ं ह वै तत्र व्यावृत्तं भवति।

यत्रैतेन यज्ञेन यजन्ते।
एष वै प्रतिष्ठितो नाम यज्ञः।
सर्वग्ं ह वै तत्र प्रतिष्ठितं भवति॥ **71**॥

यत्रैतेन यज्ञेन यजन्ते।
एष वै तेजस्वी नाम यज्ञः।
सर्वग्ं ह वै तत्र तेजस्वि भवति।
यत्रैतेन यज्ञेन यजन्ते।
एष वै ब्रह्मवर्चसी नाम यज्ञः।
आ ह वै तत्र ब्राह्मणो ब्रह्मवर्चसी जायते।
यत्रैतेन यज्ञेन यजन्ते।
एष वा अतिव्याधी नाम यज्ञः।
आ ह वै तत्र राजन्योऽतिव्याधी जायते।
यत्रैतेन यज्ञेन यजन्ते।
एष वै दीर्घो नाम यज्ञः।
दीर्घायुषो ह वै तत्र मनुष्या भवन्ति।
यत्रैतेन यज्ञेन यजन्ते।
एष वै क्लृप्तो नाम यज्ञः।
कल्पते ह वै तत्र प्रजाभ्यो योगक्षेमः।
यत्रैतेन यज्ञेन यजन्ते॥ **72**॥

पर्यस्वान्नाम यज्ञः प्रतिष्ठितं भवति यत्रैतेन यज्ञेन यजन्ते षट्च॥ **19**॥

एषवै विभूः प्रभूरूर्जस्वान्पयस्वान् विधृतो व्यावृत्तः प्रतिष्ठितस्तेजस्वी ब्रह्मवर्चस्यतिव्याधी दीर्घः क्लृप्तो द्वादश॥

तार्प्येणाश्वगं संज्ञपयन्ति।
यज्ञो वै तार्प्यम्।
यज्ञेनैवैनगं समर्धयन्ति।
यामेन साम्ना प्रस्तोताऽनूपतिष्ठते।
यमलोकमेवैनं गमयति॥
तार्प्ये च कृत्यधीवासे चाश्वगं संज्ञपयन्ति।
एतद्वै पशूनागं रूपम्।
रूपेणैव पशूनवरुन्धे।
हिरण्यकशिपु भवति।
तेजसोऽवरुद्ध्यै॥ 73॥

रुक्मो भवति।
सुवर्गस्य लोकस्यानुख्यात्यै।
अश्वो भवति।
प्रजापतेराप्त्यै।
अस्य वै लोकस्य रूपं तार्प्यम्।
अन्तरिक्षस्य कृत्यधीवासः।
दिवो हिरण्यकशिपु।
आदित्यस्य रुक्मः।

प्रजापतेरश्वः।
इममेव लोकं ताप्र्येणाप्नोति॥ **74**॥

अन्तरिक्षं कृत्यधीवासेन।
दिवग्ं हिरण्यकशिपुना।
आदित्यग्ं रुक्मेण।
अश्वेनैव मेध्येन प्रजापतेः सायुज्यग्ं सलोकतामाप्नोति।
एतासामेव देवतानाग्ं सायुज्यम्।
सार्ष्टिताग्ं समानलोकतामाप्नोति।
योऽश्वमेधेन यजते।
य उ चैनमेवं वेद॥ **75**॥

अवरुद्ध्या आप्नोत्यष्टौ च॥ **20**॥

आदित्याश्चाङ्गिरसश्च सुवर्गे लोकेऽस्पर्धन्त।
तेऽङ्गिरस आदित्येभ्यः।
अमुमादित्यमश्वग्ं श्वेतं भूतं दक्षिणामनयन्न्।
तेऽब्रुवन्न्।
यं नोऽनैष्ट।
स वर्योऽभूदिति।
तस्मादश्वग्ं सवर्येत्याह्वयन्ति।
तस्माद्यज्ञे वरो दीयते।

यत्प्र॒जाप॑ति॒राल॒ब्धोऽश्वोऽभ॑वत्।
तस्मा॒दश्वो॒ नाम॑॥ **76**॥

यच्छ्वय॒दरु॒रासी॓त्।
तस्मा॒दर्वा॒ नाम॑।
यथ्स॒द्यो वाजा॓न्थ्स॒मज॑यत्।
तस्मा॓द्वा॒जी नाम॑।
यदसु॑राणां लो॒कानाद॑त्त।
तस्मा॑दादि॒त्यो नाम॑।
अ॒ग्निर्वा अ॑श्वमे॒धस्य॒ योनि॑रा॒यत॑नम्।
सूर्यो॒ऽग्नेर्योनि॑रा॒यत॑नम्।
यद॑श्वमे॒धे॓ऽग्नौ चित्य॑ उत्तरवे॒दिमु॑प॒वप॑ति।
योनि॑मन्तमे॒वैन॑मा॒यत॑नवन्तं करोति॥ **77**॥

योनि॑माना॒यत॑नवान्भवति।
स ए॒वं वेद॑।
प्रा॒णा॒पा॒नौ वा ए॒तौ दे॒वाना॓म्।
यद॑र्काश्वमे॒धौ।
प्रा॒णा॒पा॒नावे॒वाव॑रुन्धे।
ओजो॒ बल॒ं वा ए॒तौ दे॒वाना॓म्।
यद॑र्काश्वमे॒धौ।
ओजो॒ बल॑मे॒वाव॑रुन्धे।

अ॒ग्निर्वा अ॑श्वमे॒धस्य॒ योनि॑रा॒यत॑नम्।
सूर्यो॒ऽग्नेर्योनि॑रा॒यत॑नम्।
यद॑श्वमे॒धे᳚ऽग्नौ चित्य॑ उत्तरवे॒दिं चि॒नोति॑।
ताव॑र्काश्वमे॒धौ।
अ॒र्का॒श्व॒मे॒धावे॒वाव॑रुन्धे।
अथो॑ अर्काश्वमे॒धयो॑रे॒व प्रति॑तिष्ठति॥ **78** ॥

नाम॑ करोति॒ सू॒र्यो॒ऽग्नेर्योनि॑रा॒यत॑नं च॒त्वारि॑ च॥ **21** ॥

प्र॒जाप॑तिं॒ वै दे॒वाः पि॒तर᳚म्।
प॒शुं भू॒तं मेधा॒याल॑भन्त।
तमा॒लभ्योपा॑वसन्न्।
प्रा॒तर्य॑ष्टा᳚स्मह॒ इति॑।
एकं॒ वा ए॒तद्दे॒वाना॒मह॑ः।
यथ्सं॑वथ्स॒रः।
तस्मा॒दश्व॑ः पु॒रस्ता᳚थ्संवथ्स॒र आल॑भ्यते।
यत्प्र॒जाप॑ति॒राल॒ब्धोऽश्वोऽभ॑वत्।
तस्मा॒दश्व॑ः।
यथ्स॒द्यो मेधोऽभ॑वत्॥ **79** ॥

तस्मा॑दश्वमे॒धः।
वेदु॒कोऽश्व॑मा॒शु भ॑वति।
य ए॒वं वेद॑।

यद्वै तत्प्रजापतिरालब्धोऽश्वोऽभवत्।
तस्मादश्वः प्रजापतेः पशूनामनुरूपतमः॥
आऽस्य पुत्रः प्रतिरूपो जायते।
य एवं वेद।
सर्वाणि भूतानि सम्भृत्यालभते।
समेनं देवास्तेजसे ब्रह्मवर्चसाय भरन्ति।
योऽश्वमेधेन यजते॥ **80**॥

य उं चैनमेवं वेद।
एतद्वै तद्देवा एतां देवताम्।
पशुं भूतं मेधायालभन्त।
यज्ञमेव।
यज्ञेन यज्ञमयजन्त देवाः।
कामप्रं यज्ञमकुर्वत।
तेऽमृतत्वमकामयन्त।
तेऽमृतत्वमगच्छन्न्।
योऽश्वमेधेन यजते।
देवानामेवायनेनैति॥ **81**॥

प्राजापत्येनैव यज्ञेन यजते कामप्रेण।
अपुनर्मारमेव गच्छति।
एतस्य वै रूपेण पुरस्तात्प्राजापत्यमृषभं तूपरं बहुरूपमालभते।

सर्वेभ्यः कामेभ्यः।
सर्वस्याप्त्यै।
सर्वस्य जित्यै।
सर्वमेव तेनाप्नोति।
सर्वं जयति।
योऽश्वमेधेन यजंते।
य उं चैनमेवं वेदं॥ **82**॥

मेधोऽभंवद्यजंत एति वेदं॥ **22**॥

यो वा अश्वंस्य मेध्यंस्य लोमंनी वेदं।
अश्वंस्यैव मेध्यंस्य लोमं लोमञ्जुहोति।
अहोरात्रे वा अश्वंस्य मेध्यंस्य लोमंनी।
यथ्सायं प्रांतर्जुहोतिं।
अश्वंस्यैव मेध्यंस्य लोमं लोमञ्जुहोति।
एतदंनुकृति ह स्म वै पुरा।
अश्वंस्य मेध्यंस्य लोमं लोमञ्जुह्वति।
यो वा अश्वंस्य मेध्यंस्य पदे वेदं।
अश्वंस्यैव मेध्यंस्य पदे पंदे जुहोति।
दर्शपूर्णमासौ वा अश्वंस्य मेध्यंस्य पदे॥ **83**॥

यद्दंर्शपूर्णमासौ यजंते।
अश्वंस्यैव मेध्यंस्य पदे पंदे जुहोति।

ए॒तद॑नुकृति ह स्म॒ वै पु॒रा।
अश्व॑स्य॒ मेध्य॑स्य प॒दे प॑दे जुह्वति।
यो वा अश्व॑स्य॒ मेध्य॑स्य वि॒वर्त॑नं॒ वेद॑।
अश्व॑स्यै॒व मेध्य॑स्य वि॒वर्त॑ने विवर्तने जुहोति।
अ॒सौ वा आ॑दि॒त्योऽश्व॑ः।
स आ॑हव॒नीय॒माग॑च्छति।
तद्विव॑र्तते।
यद॑ग्निहो॒त्रं जु॒होति॑।
अश्व॑स्यै॒व मेध्य॑स्य वि॒वर्त॑ने विवर्तने जुहोति।
ए॒तद॑नुकृति ह स्म॒ वै पु॒रा।
अश्व॑स्य॒ मेध्य॑स्य वि॒वर्त॑ने विवर्तने जुह्वति॥ **84**॥

प॒दे अ॑ग्निहो॒त्रं जु॒होति॒ त्रिणि॑ च॥ **23**॥

प्र॒जाप॑ति॒स्तम॑ष्टाद॒शिभि॑ः प्र॒जाप॑तिरकामयतो॒भाव॒स्मै
यु॒ञ्जन्ति॒ तेज॒साऽप॑ प्रा॒णा अप॒ श्रीरू॒र्ध्वां प्र॒जाप॑तिः
प्रे॒णाऽनु॑ प्रथ॒मेन॑ प्र॒जाप॑तिरकामयत म॒हान् वै॒श्वदे॒वो
वा अश्वोऽश्व॑स्य प्र॒जाप॑ति॒स्तं य॑ज्ञक्र॒तुभि॒रप॒
श्रीर्ब्रा॑ह्मणौ सर्वे॑षु वारु॒णो यद्यश्व॒ं तदा॑हुरे॒ष वै
वि॒भूस्ता॒र्प्येणा॑ऽऽदि॒त्याः प्र॒जाप॑तिं पि॒तरं॒ यो वा
अश्व॑स्य॒ मेध्य॑स्य॒ लोम॑नी॒ त्रयो॑विग्ंशतिः॥ **23**॥

प्र॒जाप॑तिर॒स्मिन्लो॒क उ॑त्तर॒तः श्रिय॑मे॒व
प्र॒जाप॑तिरकामयत म॒हान् यत्प्रा॒तः प्र वा ए॒ष

एभ्यो लोकेभ्यः सर्वगं ह वै तत्र पर्यस्वद्य
उं चैनमेवं वेद चत्वार्यशीतिः ॥ **84** ॥

प्रजापतिरश्वमेधं जुहति ॥

**॥ इति कृष्णयजुर्वेदीय तैत्तिरीय ब्राह्मणे**
**तृतीयाष्टके नवमः प्रश्नः समाप्तः ॥**